# Shri SarasvatI Kavacham

# શ્રીસરસ્વતીકવચમ્

## Document Information

Text title : sarasvatIkavacham rudrayAmala

File name : sarasvatIkavachamrudrayAmala.itx

Category : kavacha, devii, sarasvatI, devI

Location : doc_devii

Transliterated by : DPD

Proofread by : DPD, NA

Description-comments : rudrayAmalatantra dashavidyArahasye

Latest update : June 1, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

# શ્રીસરસ્વતીકવચમ્

ભૈરવ ઉવાચ -

શ ृણુ દેવિ! પ્રવક્ષ્યામિ વાણીકવચમુત્તમમ્ ।
ત્રૈલોક્યમોહનં નામ દિવ્યં ભોગાપવર્ગદમ્ ॥ ૧॥

મૂલમન્ત્રમયં સાધ્યમષ્ટસિદ્ધિપ્રદાયકમ્ ।
સર્વૈશ્વર્યપ્રદં લોકે સર્વાઙ્ગમવિનિશ્ચિતમ્ ॥ ૨॥

પઠનાચ્છ્રવણાત્ દેવિ! મહાપાતકનાશનમ્ ।
મહોત્પાતપ્રશમનં મૂલવિદ્યામનોહરમ્ ॥ ૩॥

યદ્ધૃત્વા કવચં બ્રહ્મા વિષ્ણુરીશઃ શચીપતિઃ ।
યમોઽપિ વરુણશ્ચૈવ કુબેરોઽપિ દિગીશ્વરાઃ ॥ ૪॥

બ્રહ્મા સૃજતિ વિશ્વં ચ વિષ્ણુર્દૈત્યનિસૂદનઃ ।
શિવઃ સંહરતે વિશ્વ જિષ્ણુઃ સુમનસાં પતિઃ ॥ ૫॥

દિગીશ્વરાશ્ચ દિક્પાલા યથાવદનુભૂતયે ।
ત્રૈલોક્યમોહનં વક્ષ્યે ભોગમોક્ષૈકસાધનમ્ ॥ ૬॥

સર્વવિદ્યામયં બ્રહ્મવિદ્યાનિધિમનુત્તમમ્ ।
ત્રૈલોક્યમોહનસ્યાસ્ય કવચસ્ય પ્રકીર્તિતઃ ॥ ૭॥

વિનિયોગઃ -
ઋષિઃ કણ્વો વિરાટ્ છન્દો દેવી સરસ્વતી શુભા ।
અસ્ય શ્રીસરસ્વતી દેવતા, હ્રીં બીજં, ૐ શક્તિઃ, ઐં કીલકં,
ત્રિવર્ગફલસાધને વિનિયોગઃ ।

ઋષ્યાદિન્યાસઃ -
કણ્વઋષયે નમઃ શિરસિ । વિરાટ્ છન્દસે નમઃ મુખે ।
દેવીસરસ્વત્યૈ નમઃ હૃદિ । હ્રીં બીજાય નમઃ ગુહ્યે ।

ૐ શક્તયે નમઃ નાભૌ । ઐં કીલકાય નમઃ પાદયોઃ ।
ત્રિવર્ગફલસાધને વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

ૐ ઐં હ્રીં હ્રીં પાતુ વાણી શિરો મે સર્વદા સતી ।
ૐ હ્રીં સરસ્વતી દેવી ભાલં પાતુ સદા મમ ॥ ૮॥

ૐ હ્રીં ભ્રુવૌ પાતુ દુર્ગા દૈત્યાનાં ભયદાયિની ।
ૐ ઐં હ્રીં પાતુ નેત્રે સર્વમઙ્ગલમઙ્ગલા ॥ ૯॥

ૐ હ્રીં પાતુ શ્રોત્રયુગ્મં જગદભયકારિણી ।
ૐ ઐં નાસા પાતુ નિત્યં વિદ્યા વિદ્યાવરપ્રદા ॥ ૧૦॥

ૐ હ્રીં ઐં પાતુ વક્ત્રં વાગ્દેવી ભયનાશિની ।
અં આં ઇં ઈં પાતુ દન્તાન્ ત્રિદન્તેશ્વર પૂજિતાઃ ॥ ૧૧॥

ઉં ઊં ઋં ૠં લૃં લૄં એં ઐં પાતુ ઓષ્ઠૌ ચ ભારતી ।
ઓં ઔં અં અઃ પાતુ કણ્ઠં નીલકણ્ઠાઙ્કવાસિની ॥ ૧૨॥

કં ખં ગં ઘં ઙં પાયાન્મે ચાંસૌ દેવેશપૂજિતા ।
ચં છં જં ઝં ઞં મે પાતુ વક્ષો વક્ષઃસ્થલાશ્રયા ॥ ૧૩॥

ટં ઠં ડં ઢં ણં પાયાન્મે પાર્શ્વૌ પાર્શ્વનિવાસિની ।
તં થં દં ધં નં મે પાતુ મધ્યે લોકેશપૂજિતા ॥ ૧૪॥

પં ફં બં ભં મં પાયાન્મે નાભિં બ્રહ્મેશસેવિતા ।
યં રં લં વં પાતુ ગુહ્ય નિતમ્બપ્રિયવાદિની ॥ ૧૫॥

શં ષં સં હં કટિં પાતુ દેવી શ્રીવગલામુખી ।
ઊરૂ ળં ક્ષં સદા પાતુ સર્વાવિદ્યાપ્રદા શિવા ॥ ૧૬॥

સરસ્વતી પાતુ જઙ્ઘે રમેશ્વરપ્રપૂજિતા ।
ૐ હ્રીં ઐં હ્રીં પાતુ પાદૌ પાદપીઠનિવાસિની ॥ ૧૭॥

વિસ્મારિતં ચ યત્ સ્થાનં યદ્દેશો નામ વર્જિતઃ ।
તત્સર્વં પાતુ વાગેશી મૂલવિદ્યામયી પરા ॥ ૧૮॥

પૂર્વે માં પાતુ વાગ્દેવી વાગેશી વહ્નિકે ચ મામ્ ।
સરસ્વતી દક્ષિણે ચ નૈરૃત્યે ચાનલપ્રિયા ॥ ૧૯॥

પશ્ચિમે પાતુ વાગીશા વાયૌ વેણામુખી તથા ।
ઉત્તરે પાતુ વિદ્યા ચૈશાન્યાં વિદ્યાધરી તથા ॥ ૨૦॥

અસિતાઙ્ગો જલાત્ પાતુ પયસો રુરુભૈરવઃ ।
ચણ્ડશ્ચ પાતુ વાતાન્મે ક્રોધેશઃ પાતુ ધાવતઃ ॥ ૨૧॥

ઉન્મત્તસ્તિષ્ઠતઃ પાતુ ભીષણશ્ચાગ્રતોઽવતુ ।
કપાલી માર્ગમધ્યે ચ સંહારશ્ચ પ્રવેશતઃ ॥ ૨૨॥

પાદાદિમૂર્ધપર્યન્તં વપુઃ સર્વત્ર મેઽવતુ ।
શિરસઃ પાદપર્યન્તં દેવી સરસ્વતી મમ ॥ ૨૩॥

ઇતીદં કવચં વાણી મન્ત્રગર્ભં જયાવહમ્ ।
ત્રૈલોક્યમોહનં નામ દારિદ્ર્યભયનાશનમ્ ॥ ૨૪॥

સર્વરોગહરં સાક્ષાત્ સિદ્ધિદં પાપનાશનમ્ ।
વિદ્યાપ્રદં સાધકાનાં મૂલવિદ્યામયં પરમ્ ॥ ૨૫॥

પરમાર્થપ્રદં નિત્યં ભોગમોક્ષૈકકારણમ્ ।
યઃ પઠેત્ કવચં દેવિ! વિવાદે શત્રુસઙ્કટે ॥ ૨૬॥

વાદિમુખં સ્તમ્ભયિત્વા વિજયી ગૃહમેષ્યતિ ।
પઠનાત્ કવચસ્યાસ્ય રાજ્યકોપઃ પ્રશામ્યતિ ॥ ૨૭॥

ત્રિવારં યઃ પઠેદ્ રાત્રૌ શ્મશાને સિદ્ધિમાપ્નુયાત્ ।
રસૈર્ભૂર્જે લિખેદ્ વર્મ રવિવારે મહેશ્વરિ! ॥ ૨૮॥

અષ્ટગન્ધૈર્લાક્ષયા ચ ધૂપદીપાદિતર્પણૈઃ ।
સુવર્ણગુટિકાં તત્સ્થાં પૂજયેત્ યન્ત્રરાજવત્ ॥ ૨૯॥

ગુટિકૈષા મહારૂપા શુભા સરસ્વતીપ્રદા ।
સર્વાર્થસાધની લોકે યથાઽભીષ્ટફલપ્રદા ॥ ૩૦॥

ગુટિકેયં શુભા દેવ્યા ન દેયા યસ્ય કસ્યચિત્ ।
ઇદં કવચમીશાનિ મૂલવિદ્યામયં ધ્રુવમ્ ॥ ૩૧॥

વિદ્યાપ્રદં શ્રીપદં ચ પુત્રપૌત્રવિવર્ધનમ્ ।
આયુષ્યકરં પુષ્ટિકરં શ્રીકરં ચ યશઃ પ્રદમ્ ॥ ૩૨॥

ઇતીદં કવચં દેવિ! ત્રૈલોક્યમોહનાભિધમ ।
કવચં મન્ત્રગર્ભં તુ ત્રૈલોક્ય મોહનાભિધમ્ ॥ ૩૩॥

॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે દશવિદ્યારહસ્યે સરસ્વતી કવચમ્ ॥

Encoded and proofread by DPD

*Shri SarasvatI Kavacham*

pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*